# kaula upanishad

# કૌલોપનિષત્

## Document Information

Text title : kaulopaniShat.h

File name : kaula.itx

Category : upanishhat

Location : doc_upanishhat

Transliterated by : Michael Magee <ac70 at cityscape.co.uk>

Proofread by : Mike Magee <ac70 at cityscape.co.uk>

Description-comments : kaulopaniShat.h

Source : http://www.hubcom.com/tantric/

Latest update : Dec. 27, 1997

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# કૌલોપનિષત્

॥ શ્રીઃ ॥

કૌલોપનિષત્ ।

શન્નઃ કૌલિકઃ શન્નો વારુણી શન્નઃ શુદ્ધિઃ શન્નો। આગ્નિશ્શન્નઃ
સર્વં સમભવત્ । નમો બ્રહ્મણે નમઃ પૃથિવ્યૈ નમોઽદ્ભ્યો
નમોઽગ્નયે નમો વાયવે નમો ગુરુભ્યઃ ।

ત્વમેવ પ્રત્યક્ષં સૈવાસિ ।

ત્વામેવ પ્રત્યક્ષં તાં વદિષ્યામિ ।

ઋતં વદિષ્યામિ ।

સત્યં વદિષ્યામિ ।

તન્મામવતુ ।

તદ્વક્તારમવતુ ।

અવતુ મામ્ ।

અવતુ વક્તારમ્ ।

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ।

અથાતો ધર્મજિજ્ઞાસા ।

જ્ઞાનં બુદ્ધિશ્ચ ।

જ્ઞાનં મોક્ષૈકકારણમ્ ।

મોક્ષસ્સર્વાત્મતાસિદ્ધિઃ ।

પઞ્ચ વિષયાઃ પ્રપઞ્ચઃ ।

તેષાં જ્ઞાનસ્વરૂપાઃ ।

યોગો મોક્ષઃ ।

અધર્મકારણાજ્ઞાનમેવ જ્ઞાનમ્ ।

પ્રપઞ્ચ ઈશ્વરઃ ।

અનિત્યં નિત્યમ્ ।

અજ્ઞાનં જ્ઞાનમ્ ।

અધર્મ એવ ધર્મઃ ।

એષ મોક્ષઃ ।

પઞ્ચ બન્ધા જ્ઞાનસ્વરૂપાઃ ।

પિણ્ડાજ્જનનમ્ ।

તત્રૈવ મોક્ષઃ ।

એતજ્જ્ઞાનમ્ ।

સર્વેન્દ્રિયાણાં નયનં પ્રધાનમ્ ।

ધર્મવિરુદ્ધાઃ કાર્ય્યાઃ ।

ધર્મવિહિતા ન કાર્ય્યાઃ ।

સર્વં શામ્ભવીરૂપમ્ ।

આમ્નાયા ન વિદ્યન્તે ।

ગુરુરેકઃ ।

સર્વૈક્યતાબુદ્ધિમન્તે ।

આમન્ત્રસિદ્ધેઃ ।

મદાદિસ્ત્યાજ્યઃ ।

પ્રાકટ્યં ન કુર્ય્યાત્ ।

ન કુર્ય્યાત્પશુસમ્ભાષણમ્ ।

અન્યાયો ન્યાયઃ ।

ન ગણયેત્કમપિ ।

આત્મરહસ્યં ન વદેત્ ।

શિષ્યાય વદેત્ ।

અન્તઃ શાક્તઃ ।

બહિઃ શૈવઃ ।

લોકે વૈષ્ણવઃ ।

અયમેવાચારઃ ।

આત્મજ્ઞાનાન્મોક્ષઃ ।

લોકાન્ન નિન્દ્યાત્ ।

ઇત્યધ્યાત્મમ્ ।

વ્રતં ન ચરેત્ ।

ન તિષ્ઠેન્નિયમેન ।

નિયમાન્ન મોક્ષઃ ।

કૌલપ્રતિષ્ઠાં ન કુર્ય્યાત્ ।

સર્વસમો ભવેત્ ।
સ મુક્તો ભવતિ ।
પઠેદેતાનિ સૂત્રાણિ પ્રાતરુત્થાય દેશિકઃ ।
આજ્ઞાસિદ્ધિર્ભવેત્તસ્ય ઇત્યાજ્ઞા પારમેશ્વરી ।
યશ્ચાચારવિહીનોઽપિ યો વા પૂજાં ન કુર્વતે ।
યદિ જ્યેષ્ઠં ન મન્યેત નન્દતે નન્દને વને ।
શન્નઃ કૌલિકઃ ।
ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ।
॥ કૌલોપનિષત્સમાપ્તા ॥

॥ ઇતિ કૌલોપનિષત્ ॥

Encoded and proofread by Mike Magee (ac70 at cityscape.co.uk)

*kaula upanishad*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*